This Question Paper consists 35 questions and 7 printed pages.
**अस्मिन् प्रश्नपत्रे 35 प्रश्नाः एवम् 7 मुद्रित पृष्ठाः सन्ति ।**

Sl. No.

| Roll No. **अनुक्रमाङ्कः** | | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|---|

Code No. **गुढसंख्या** 63/S/A

Set /**स्तबकः** A

# SANSKRIT SAHITYA
# संस्कृतसाहित्यम्
# (248)

Day and Date of Examination
**(परीक्षादिवसः दिनाङ्कश्च)** ______________________

Signature of Invigilators
**(निरीक्षकयोः हस्ताक्षरम्)**
1. ______________________
2. ______________________

**सामान्या निर्देशाः :**

1. अनुक्रमाङ्कः प्रश्नपत्रस्य प्रथमपृष्ठे नूनं लेख्यः।
2. निरीक्ष्यताम् यत् प्रश्नपत्रस्य पृष्ठसंख्या प्रश्नानां च संख्या प्रथमपृष्ठस्य प्रारम्भे प्रदत्तसंख्या समाना न वा। प्रश्नक्रमः सम्यग् न वा।
3. वस्तुनिष्ठप्रश्ननाम् (क), (ख), (ग), (घ) एषु विकल्पेषु युक्तम् उत्तरं चित्वा उत्तरपत्रे लेख्यम्।
4. समेषां प्रश्नानाम् उत्तराणि निर्धारितसमये एवं लेख्यानि।
5. उत्तरपत्रे आत्मपरिचयात्मकं लेखनम् अथवा निर्दिष्टस्थानं विहाय अन्यत्र क्वापि अनुक्रमाङ्कलेखनं सर्वथा वर्जितमस्ति।
6. स्वस्य उत्तरपत्रे प्रश्नपत्रस्य गूढसंख्या 63/S/A, Set- A नूनं लेख्या।
7. समेषां प्रश्नानाम् उत्तराणि संस्कृतभाषया एवं लेख्यानि।

## SANSKRIT SAHITYA
## संस्कृतसाहित्यम्
## (248)

परीक्षासमयावधिः (Time) होरात्रयम् (3 Hrs)] [पूर्णाङ्काः (Full Marks) : 100

**निर्देशाः :** (i) अस्मिन् प्रश्नपत्रे **[A]** भागे **10, [B]** भागे **10, [C]** भागे **10, [D]** भागे **5** इति आहत्य **35** प्रश्नाः सन्ति ।

(ii) प्रश्नस्य दक्षिणे पार्श्वे संख्यासु (अङ्काः × प्रश्नाः = पूर्णाङ्काः) इति एवम् अङ्कान् निर्दिशति ।

(iii) **सर्वे** प्रश्नाः **अनिवार्याः** ।

**[A]** दशानां प्रश्नानां युक्तं विकल्पं चिनुत । **[1×10=10]**

**1.** ''रक्ताः पृच्छन्ति गुणान् दोषान् पृच्छन्ति ये विरक्ताः'' – कुत्र वर्तते?

(क) शुकसप्ततौ

(ख) वेतालपञ्चविंशतौ

(ग) पञ्चतन्त्रे

(घ) हितोपदेशे ।

**2.** ''फलाग्रे वृक्ष एव च'' – को वृक्षः सूच्यते?

(क) आम्रवृक्षः

(ख) शिंशपावृक्षः

(ग) जम्बुवृक्षः

(घ) अनानासवृक्षः ।

3. ''अपूर्ववस्तुनिर्माणक्षमा प्रतिभा'' – कस्य मतम्?

(क) भट्टतौतस्य

(ख) अभिनवगुप्तस्य

(ग) जगन्नाथस्य

(घ) दण्डिनः।

4. काव्यम् इत्यत्र कः प्रत्ययः?

(क) यत्

(ख) ण्यत्

(ग) ष्यञ्

(घ) क्यप्।

5. ''लताकुञ्जं गुञ्जन् मदवदलिपुञ्जं चपलयन्'' – इत्यत्र का रीतिः वर्तते?

(क) वैदर्भी

(ख) गौडी

(ग) लाटी

(घ) पाञ्चाली।

6. ''काव्यं ग्राह्यमलङ्कारात्'' – कस्य मतम्

(क) मम्मटस्य

(ख) वामनस्य

(ग) भोजस्य

(घ) जगन्नाथस्य

7. ''तत्तथा हि कविष्यावो वचनात्तव सत्तम'' – इत्यत्र सत्तमः कः?

(क) रामः

(ख) लक्ष्मणः

(ग) हनुमान्

(घ) सुग्रीवः

8. ''अभ्यभाषत वाक्यज्ञो वाक्यज्ञं पवनात्मजम्'' – इत्यत्र प्रथमान्तवाक्यज्ञपदेन को बोध्यते?

(क) सुग्रीवः

(ख) हनुमान्

(ग) रामः

(घ) लक्ष्मणः।

9. इन्द्रः केन रूपेण कर्णसमीपम् आगतवान्?

(क) ब्राह्मणरूपेण

(ख) भिक्षुरूपेण

(ग) सन्यासिरूपेण

(घ) पक्षिरूपेण।

10. ''इतीरयित्वा गिरमात्तसत्क्रिये'' – कः गिरमुक्तवान्?

(क) युधिष्ठिरः

(ख) भीमः

(ग) अर्जुनः

(घ) वनेचरः।

[B] दशानां यथानिर्देशम् उत्तराणि लिखत। [2×10=20]

1. मनुष्याणां महान् रिपुः कः? को वा उत्तमो बान्धवः? [1+1]

2. बान्धवस्य लक्षणानि लिखत।

3. ''कोऽनङ्गरतिपतिः'' इति कथायां कति विज्ञानिनः आसन्? तेषां नामानि लिखत। [1+1]

4. मम्मटाचार्यमते काव्यस्य प्रयोजनानि कति? तान कानि? [1+1]

5. ''नवपलाशपलाशवनम्....'' इति श्लोके कः अलङ्कारः? तस्य लक्षणं किम्? [1+1]

6. हनुमतः केषु अङ्गेषु दोषो नास्ति?

7. कर्णभारनाटकस्य भरतवाक्यं लिखत।

8. कर्णस्य गुरुः कः? कर्णं प्रति तस्य अभिशापः कः आसीत्? [1+1]

9. त्रिगणः कः? दुर्योधनस्य त्रिगणः परस्परं किमर्थं न बाधते? [1+1]

10. वर्णिलिङ्गी कः? स कुत्र समाययौ? [1+1]

[C] दश अनतिदीर्घोत्तरैः समाधत्त। [4×10=40]

1. अतिथिसत्कारविषयकं सुभाषितश्लोकमेकं व्याख्यात।।

2. वचो हि सत्यं परमं विभूषणं

लज्जाङ्गनायाः कृशता कटौ च।

द्विजस्य विद्यैव पुनस्तथा क्षमा

शीलं हि सर्वस्य नरस्य भूषणम्।। इति श्लोकं व्याख्यात।

3. ''गगनं भ्रमरायते'' इति समस्यां समाधत्त।

4. ''भद्र न सर्वमेतद्धनं गृहं प्रति नेतुं युज्यते'' – केन कुतः इदमुक्तम् इति ''यतो धर्मस्ततो जयः'' इति कथाधारेण लिखत।

5. सहृदयविषये संक्षेपेण टीकां लिखत।

6. हनुमतः वेदज्ञानविषये रामस्योक्तिं स्वभाषया वर्णयत।

7. कर्णस्य वीरत्वं स्वभाषया उपस्थाप्यताम्।

8. कर्णः इन्द्राय कीदृशान् हयान् गजान् च दातुमैच्छत्?

9. ''कथाप्रसङ्गेन जनैरुदाहृतादनुस्मृताखण्डलसूनुविक्रमः।

तवाभिधानाद्व्यथते नताननः सुदुः सहान्मन्त्रपदादिवोरगः।। इति श्लोकस्य पक्षद्वये अर्थं लिखत।

10. व्रजन्ति ते मूढधियः पराभवं भवन्ति मायाविषु ये न मायिनः।

प्रविश्य हि घ्नन्ति शठास्तथाविधानसंवृताङ्गान्निशिता इवेषवः।। इति श्लोकं व्याख्यात।

[D] पञ्च दीर्घोत्तरैः समाधेयाः। [6×5=30]

1. ''पुरः पत्युः कामात् श्वशुरमियमालिङ्गति सती'' – इति समस्यां समाधत्त।

2. वेदाङ्गानां सामान्यपरिचयः प्रदेयः।

3. हनुमद्वचनमाश्रित्य रामलक्ष्मणयोः देहसौष्ठवम् उपस्थाप्यताम्।

4. विमलानामकशक्तिं कर्णः किमर्थं प्राप्तवान् इति स्वभाषया लिखत।

5. वनेचरेण द्रौपद्या च युधिष्ठिरस्य प्रोद्बोधः कथं विहित इति स्वगिरा उपस्थाप्यताम्।

✈ ✈ ✈